# Navaratnamalika Ambikastutih

# नवरत्नमालिका अम्बिकास्तुतिः

## Document Information

Text title : navaratnamAlikA ambikAstutiH

File name : navaratnamAlikA.itx

Category : devii, pArvatI, devI, nava

Location : doc_devii

Author : narakaNThIravashAstri

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description/comments : shrIkAlahastikShetrasthajnAnaprasUnAmbikAstutiH, from Malayamaruta 4 pages 5-6

Latest update : August 18, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# नवरत्नमालिका अम्बिकास्तुतिः

(श्रीकालहस्तिक्षेत्रस्थज्ञानप्रसूनाम्बिकास्तुतिः)
श्रीनरकण्ठीरवशास्त्रिविरचिता ।

श्रीनाकनाथमुखनानासहस्रसुरसेनाग्रमौलिवलभी-
सूनावलीबहुललीनालिनीमधुरगानाञ्चिताङ्घ्रिनलिना ।
मानातिलङ्घिमहिमानादिरानतजनानामनेकफलदा
ज्ञानाम्बिका भवतु दीनावनी कुशलदानाय मे भगवती ॥ १॥

राकाशशाङ्करुचिराकारचारुपादना(पतदा)काशसिन्धुलहरी-
नीकाशसूक्तिसरणीकारिणी प्रकृतिमूकात्मनामपि नृणाम् ।
पाकाहितप्रमुखनाकालयप्रकरशोकापनोदनचणा
श्रीकालहस्तिनगरैकायनावतु पिनाकायुधस्य दयिता ॥ २॥

श्रेणीभवद्द्विविषदेणीदृगुल्लसितवेणीपिनद्धसुमनो-
द्रोणीमरन्दरसवेणीप्रसारभृशशोणीकृताङ्घ्रिकमला ।
श्रोणीनटत्सरकृपाणीमनोज्ञघनवेणी कृपार्द्रहृदया
क्षोणीधरेन्द्रतनयाणीयसीमपि च वाणीं प्रगल्भयतु मे ॥ ३॥

केलीसमाकलिततालीदलश्रवणपालीविभूषणमणी-
वा(पा)ली मदोद्धतमरालीगतिर्दिशतु नालीकदीर्घनयना ।
चूलीतलाभरणनालीकवैरिशकलालीभवत्सुरवधूःऽ
काली गिरं मृदु मृणालीभुजा मम मधूलीरसोर्मिमधुराम् ॥ ४॥

हृद्यानवद्यतरगद्यानुबद्धमृदुपद्याभिरूपकवितां
दद्याज्जगन्महितविद्यां त्रयीशिखरवेद्या हिमाद्रितनया ।
आद्या परा मम शरद्यामिनीशभृदविद्याविलासशमनी
विद्याधरी समभिवाद्या ज्वलन्मणिनिषद्यायमाणरशना ॥ ५॥

हालामदाकलितहेलालसद्बहुललोलारुणाक्षियुगली
लीलापिनद्धसुरसालावलीप्रसवमालासुगन्धचिकुरा ।

कैलासनाथहितशीला कराञ्चितशुकालापलोलहृदया
वेलातिलङ्घिशुभजालाय मे भवतु शैलाधिनाथतनया ॥ ६॥

चण्डापदानयुतचण्डाभिधासुरपिचण्डावदारणचणा
भण्डासुरोग्रभुजदण्डाग्रनिर्दलनशौण्डायुधोद्धतकरा ।
शुण्डानुकारिकरकाण्डावदीर्णजगदण्डाट्टहासभयदा
दण्डायुधाय शशिखण्डावतंसितशिखण्डा न चार्पयतु माम् ॥ ७॥

हुङ्कारनिर्गलदशङ्कापतद्विषदहङ्कारमारतिमिरां
अङ्कान्तलम्बिसितकङ्कालहारसदलङ्कारबन्धुरगलाम् ।
ह्रीङ्कारिणीं भयदटङ्कारकार्मुककरां कालहस्तिनिलयां
पङ्कापहामपकलङ्कावतंसहरिणाङ्कां भजे भगवतीम् ॥ ८॥

कण्ठारवोद्यदुपकण्ठारिदुर्विषहकण्ठीरवेन्द्रगमनो-
त्कण्ठा निकामशितिकण्ठानुकर्षिकलकण्ठानुलापललिता ।
शुण्ठीभवद्दनुजकण्ठीरवप्रकरकुण्ठीकृतिक्षमबला
कुण्ठीकरोतु नरकण्ठीरवाख्यकविकण्ठीरवस्य दुरितम् ॥ ९॥

श्रीकालहस्तिनिलयज्ञानप्रसवाम्बिकामुदे रचिता ।
नरकण्ठीरवकृतिना नवरत्नस्तुतिरियं चिरं जयतु ॥ १०॥

॥ इति श्रीनरकण्ठीरवशास्त्रिविरचिता नवरत्नमालिका समाप्ता ॥

श्रीनरकण्ठीरवशास्त्रि कविरयं आन्ध्रो वट्टियल्लिवंशीयः
१९-शतकान्ते मद्रास-नगरान्नतिदवीयसि कार्वेटिनगरनाम्नि स्थले
तदधीशस्य बोम्मराजस्यास्थानकविरासीत् । अस्य पौत्रा अद्यापि जीवन्ति ।
अस्य कृतय -
१ अभिनवासवदत्ता (सुबन्धुकृत-वासवदत्तागद्यकाव्यस्य पद्यैः सङ्ग्रहः),
२ यतिसार्वभौमोपहारः (श्रीशङ्कराचार्यपारम्पर्यवर्णनम्)
३ कपिलेश्वरस्तुतिः (तिरुप्पतिक्षेत्रस्थशिवस्तुतिः); गैर्वाण्यां (४-११, १५-११-६६)
मुद्रिता ।-
४ ज्ञानप्रसूनाम्बिका नवरत्नमालिका (अत्र मुद्र्यमाणा)।
एता अद्य उपलभ्यन्ते । केचन शास्त्रग्रन्थाश्चानेन रचिताः ।
नवरत्नमालिकाया मातृका अड्यार-कोशागारेऽप्युपलभ्यते । इयं
क्वचिदन्यत्र मुद्रितेति श्रूयते, किन्तु अप्रसिद्धा दुर्लभा च ।

Encoded and proofread by Sunder Hattangadi

*Navaratnamalika Ambikastutih*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*